दाखल क्र *M628* विषय *पुराण*.

नाव. *मल्लारि माहात्म्य (mss.)*.

लेखक/लिपीकार *–*.

पृष्ठ *108* काळ *–* पूर्ण/~~अपूर्ण~~

Incomplete
mss
6/7/78

pages 1 - 108

[illegible]ारिमाहात्म्यप्रारंभः

श्रीगणेशायनमः श्रीमल्लारिमार्तंडायनमः वा
ग्वल्लीपल्लवोल्लसद्रागकरभासुरं गजास्यसुंदरं
वंदे वृंदारकगणार्चितं १ विघ्नेशचरणांभोजमकरंदो
द्बिंदवः सिंचंतुभारतीवल्लीं नम्रानां वदनालये २
कैलासाचलचूलाग्रमणिसुंदरमंदिरे पद्मछपा
र्वतीकांतं रहस्यानंदसुंदरं ३ प्रियं किं दुर्लभं लोके
किमाश्चर्यकरं परं सेवंतीयैः सदा नृणां भुक्तिमुक्ति

फलप्रदं ४ अवतारेण केनत्वं सर्वेषां सुलभः सदा
केर्दैवैस्त्वं समाराध्यः कथयास्मम प्रभो ५ श्रीशिव
उवाच पुराकृतयुगे काले पृथ्वीयां मुनीश्वरान्
सनत्कुमारो कथयत् दुःखदारिद्र्यपीडितान् ६ य
यं स्तोत्रं तीर्थमध्येकं भुक्तिमुक्तिप्रदं शिवं अधिष्ठितं
मयादेवि त्वयाच कृपयान्तणं ७ तद्वक्ष्यामि महादे
वि प्रेम्णा तव वरानने सनत्कुमार उवाच पुराध

म.म.
२

मिस्तुताः सन्नमणिच्छलं गिरिंगताः ८ तपस्विपुत्रदा
नीत्रमेकाग्रहृदयास्थिताः शांतादांताः सदाचाराः
सपुत्राः सपरिग्रहाः ९ आश्रमे रमणीयेस्मिन् वृ
क्षवल्लीजलाकुले सर्वर्तुफलसंपूर्णे कदलीखंडमं
डिते १० शांतवैरमृगव्याघ्रवम्रूरगसमाकुले र
सालसरलोल्लोलतरुणारुणपल्लवे ११ सुच्छायशी
तलोपांते मदपरावलिकूजिते कदाचित्तत्रमल्लाखे

राम.
२

दैत्यराजः समागतः १२ ज्वालाकरालवदनो राक्ष
सैः परिवारितः उदग्रकरवालाग्रधाराछिन्नमही
रुहः १३ पदातिरथनागाश्वघोषव्याकुलितामरः
लोहसन्नाहकिरणोन्मिश्रितार्कांशुमंडलः १४
आश्रमास्तेन विध्वस्ताः समस्ता अपि विस्तृताः
आक्रांतास्तरवस्तुंगास्तत्सैन्यैश्च कुंजरैः १५
लोलल्लांगूलचरणैर्घंटायंत्रावलीहतैः कुंड

स्थावर्हिषस्तस्य पुत्रैर्मरुद्भिर्निषिंचिताः १६ विचाय
देवतार्चायाः कुसुमानि महीरुहां पूजावेदिषु रम्या
सुपानकेलीश्च कारसः १७ जहुस्तदाश्रमपदं सौ
दर्येंदुः स्वतो निजं मुखं सद्यो विशालाया स्तरुण्यह
वतत्क्षणात् १८ निपेतुः शाखिनां शाखा यत्र की
र्णा महीतले वेदानामिव शाखिनग्रस्तानां शात
कन्सकेन १९ बटेबो बरबोध्यायेस्फूर्येनतर्जनेव

र्जिताः हताः कामदुघा गावो यज्ञियाः पीवरोध
सः २० आकुलीकारयामास शांतादांताः पति
व्रताः ऋषयः कंठपाशाद्यैर्वध्वा वापीषु मज्जि
ताः २१ इति दुःखाभिभूतास्ते गते तस्मिन्दुरात्म
नि किं कुर्मः क्व च गच्छामः क्व वसामः सुदुःखिताः
२२ कं विप्रं कथयामो हि विप्रुः कः पालयिष्यति
हतमस्माभिरत्युल्लंदुष्कृतं तेन विद्महे २३ कथं

कष्टमहोतोत्रानास्त्यनाथावयंवत यंनालंजेतु
मिंद्रोपिकथंजेष्यंतितंनृपाः ३४ शपामश्चेदुरा
त्मानंतपोहानिर्भविष्यति जजल्पुरितितेसर्वे
कायविह्वलचेतसः ३५ वृत्तांतमेनंदेवेंद्रंनाराय
णमथाव्रजं किंवामहेशंसर्वेशंकथयामःसुदुः
खिताः अस्तिगूढतमंकिंचित्स्थानंयत्सर्वतांतरे
कुटुंबान्यग्निहोत्राणिनेष्यामस्तत्रकिंवयं ३६

इतिश्रीब्रह्मांडपुराणेक्षेत्रखंडेमल्लारिमाहात्म्येआ
श्रमपीठनेनामप्रथमोध्यायः १ सनत्कुमारउ
वाच अथतेमुनयःसर्वेदीनचित्ताःसुदुःखिताः गो
पाप्यचकुडुंबानिकस्मिंश्चित्पर्वणांतरे १ प्रयुः
सहस्रनयननगरीममरावतीं सुधर्मायां सभायां
तमासीनंददृशुःक्षणात् २ जलदइलावलीप्रां
शुतेजोज्वालासुशोभिते सिंहासनेवीज्यमानं

म॰ म॰ ५ मरैर्हरिणीदृशां ३ यमश्चिः सेवते नित्यं दाहकर्म वि
हायच मृत्तीसुंदरयारम्या पुंजवच्छांतनेजसा ४
सरोषं कर्ममुत्स्त्राच यमोप्यत्र बाहुतांजलिः त्यक्त्वा
सराक्षसीर्वृत्तिमुपास्ते नैर्ऋतः स्वयं ५ पाशाप्यत्तु
रत्नाश्लिष्टान्वरुणः किंकराकृतिः वायुर्मूर्तिधरः शां
तः श्रांजलिः परिसेवते ६ निधिहस्तः सदा राजराज
स्तिष्ठति नतुरः रम्यमूर्तिधरः श्रीमानुपास्तेसोदि राम॰ ५

वाकरः ७ भजते सर्वभावेन देवः कुमुद्बांधवः सं
तोषयति देवानामाचार्यश्चानुवर्णनैः ८ गायंति
ललितं गीतं गंधर्वाः सुमनोहरं सिद्धचारणनागा
द्यैर्निजविद्याभिरावृताः ९ अतोषयन्स्वभावेन भ
क्त्या संपूर्णया पृथक् कांतारंभादयो नित्यं ललितै
यर्मुपासते १० तत्रागतान्समालोक्य धर्मपुत्रान्मु
नीश्वरान् सिंहासनात्समुत्थाय भक्तिपूर्वं नमाम

म.म.
६

स: ११ शक्र उवाच पूर्वपूर्वेमयायत्रजन्मजन्मां
तरादपि उपार्जितं महापुण्यैः फलितं दर्शनेनवः
१२ अस्मात्सुकृतपुण्येषु महती भवतां कृपा स्वय
मुत्कंठिता यूयं प्रीत्या यत्स्वयमागताः धन्योस्मिकृ
तकृत्योस्मि कृतपुण्योस्मि सर्वथा सत्यं स्वर्गाधिपत्यं
मेभवतामद्य दर्शनात् १४ अद्यप्रभृति निर्विघ्नं म
मकृत्यं भविष्यति निर्विघ्नकरणा यूयं गणेशइव

राम.
६

निःकराः १५ आदिशध्वं यथा कार्यं येन स्वयं स
मागताः श्रांताः क्लांताः यथा यासादति म्लानमु
खश्रियः १६ ऋषय ऊचुः हर्त्ता कर्त्ता स्वयंशास्ता
भवांस्त्रिजगतां प्रभुः तपस्वमनुतिष्ठामो भवद्द
त्ताभवोत्सवैः १७ कदाचिन्मृगयाव्याजाद्राक्ष
सैः परिवारितः आजगामाश्रमं नो सौ मल्लो का
रिमहाचार्यो १८ वयं संत्रासितास्तेन जीवशेषा

म. म.
७

यथास्थिताः अतीतानागतज्ञानाद्देवो जानाति वर्त्ते
नं १९ किंतु मः कष्टमतुलमाप्तो मणिमल्लको
दुष्टो सुरेंद्र हंतव्यो देवेन श्रीमताऽत्वया २० शक्रउ
वाच ताभ्यां तु मणिमल्लाभ्याम् ब्रह्मयोनिः सुतोषितः
एकांगुष्ठेन तपसा धूम्रपानक्रियाविधेः २१ नाहं
तयोर्वधार्थाय समर्थो ब्राह्मणोत्तमाः पराक्रमदु
राधर्षौ तपोवीर्यमदोद्धतौ २२ विनेश्वरमजेयो तौ

राम.
७

दुष्टो दुष्टबलोत्कटो प्रयातस्स्वयं वैकुंठं विष्णुर्नारा य
णस्स्वयं २३ इत्थं कदर्थिता नद्य ह्यभवंतः क्षांततेज
सः सपक्षपातादिविप्राणां दानवान् हंतुमर्हति २४
शश्वन्नियोगी तस्याहं स विष्णुर्जगतां पतिः कर्तुं न चे
वचाकर्तुं अन्यथाकर्तुमीश्वरः २५ स्रष्टेः कर्त्ता स्वयं
शास्ता स्वयं पालयिता विष्णुः हर्त्तासौ रुद्ररूपेण त
स्मान्नान्यः परः प्रभुः २६ ऋषय ऊचुः वयं किं वै भवं वि

म.म.
८

भ्यो नेविप्रो वेदशास्त्रतः इतिहासपुराणेभ्यो आग
मेभ्योविशेषतः २७ देवो गदंति किंतत्सर्वात्सत्यंच
पराक्रमं अस्माकंदेवयोगेनशक्तोप्यसमतांगतः
२८ त्वत्प्रसादात्भवंतेशक्रवयंयामोहरेर्गिरिं जहि
शत्रुगणान्सर्वान्पाहिसाधून्बुधादिकान् २८ इ
तिश्रीब्रह्मांडपुराणेक्षेत्रखंडेमल्लारिमाहात्म्येश
क्राभिगमनंनामद्वितीयोध्यायः २ सनत्कुमारउवा-

राम
८

अथतेमुनयोजग्मुर्वैकुंठंगगनाध्वना ध्यायंतः
चिंतयंतश्चहृषीकेशंसुरेश्वरं १ तेजसासन्नगु
णितंसूर्यमंडलसुंदरः व्योम्नोवतेरुः सहसावि
ष्णोःप्रासादजाजिरे २ ददृशुस्तेसभांरम्यां वेश्म
वीयत्रराजते सिंहासनसमारूढः पुंडरीकविलो
चनः ३ नीलोत्पलदलश्यामो नीलमेघघनच्छ
विः पीतांबरकृतोत्तरीयोवसनःपुण्यदर्शनः ४

चामीकरलसद्दीप्तिः केयूरकटकोज्वलः चंडांशु
चंद्रकिरणश्चारुकुंडलमंडितः ५ ज्वलद्रत्नप्रभा
पुंजग्रैवेयकविराजितः गंभीरनाभिविलसत्त्रि
वलीललितोदरः ६ उल्लसत्स्मेरवदनस्मितांश्वा
धरपल्लवः आनंदानंदसुखदश्चंदनैकविशेषतः
स्वर्णयज्ञोपवीतीच सर्वसौंदर्यसागरः रत्नमालो
ज्वलप्रांशुःस्वर्णमुकुटाकृतिः ७ नारायणःसु

राधीशः कौस्तुभोद्भासी चतुर्भुजः बद्धपर्यंकचतुरोनि
बद्धस्वस्तिकासनः ९ कृतांजलिर्वैनतेयः स्वामिनो
यस्य सेवकः आसीनः पक्षिराजोसौ यज्ञागारेध्वजो
यथा १० शंखचक्रगदापद्मान्यायुधानि समंततः
मूर्तिमंति सदा रेजुस्तेजःपुंजाकृतीनिव ११ कृपया
येपरेशस्य भक्त्या विष्णोः सनातनैः स्वरूपमुक्तिभा
जस्तेशंखचक्रगदाधृतः १२ पीतांबरधरा अतसी

कुसुमश्यामः सर्वैकमलधारिणः पीतांबरधराः स
र्वे वनमालोपशोभिताः १३ किरीटकेयूरधरा म
णिभूषाविराजिताः विमलांभोजनयनाः कुंडलैक
र्णभूषणाः १४ प्रियायेभक्तवात्सल्यात्हरयोनार
दादयः कपिलाद्याश्चयेसिद्धायेचान्येसनकादयः
१५ जगुर्गंधर्वपतयोगीतंचित्ररथादयः अंगहा
रैः सुमधुरैर्ललितैः श्चकृतितोषकार १६ प्रांगणेन

न्तनुः कांतानीलोत्पलदलेक्षणाः इवकंदर्पवल्पस्ता
स्तारूण्परसनिर्भराः १७ चेतांसिव्याकुलीचक्रुर्मु
नीनामपिसुंदराः भ्रमरीवेगतस्तांगविकीर्णकन
कप्रभाः १८ नीलजीमूतसुछायेस्वामिसेवकसंकु
ले चंचलाइवरेजुस्ताः सभागारेनिजत्विषा १९ तं
स्यांसभायांहृष्ट्वैवंमुकुंदंस्वरभूजितं प्रणेमुर्गेद्गदगि
रः कंपमानांगयष्टयः २० गात्रस्वेदजलाकीर्णविव

म॰म॰
११

णमुखमंडलाः रोमांचांचितगात्रास्ते बाष्पपूरितलो
चनाः २१ निपेतुर्दंडवद्भूमौ क्षणमुत्थाय ते पुनः तु
ष्टुवुः श्रीमहाविष्णुं धर्मपुत्राः सुसंयुताः २२ ऋषयऊ
चुः जयनित्यपरानंदकुंदमंदारजार्चित। जयलक्ष्मी
कुचांभोजराजहंसजगत्पते २३ जयनीलोत्पलाभा
स जयचंद्रांशुशोभन जयप्रपंचरहित त्रिलोकी लो
कपालक २४ जयखंडेंदुसद्भालमित चित्रचरित्र

राम॰
११

कृत जयविश्वेशविश्वात्मन्विश्वसर्गविधायक २५
श्रीभगवानुवाच तुष्टोहमेकभावेन परिष्वजत मां
लघु संकल्पा इव वचिंतस्य स्वयं मे मुनयः सदा २६
क्लांताः संत्रासिताः केन हतभाग्येन दुर्मदात् कृतं
केन तपोविघ्नं भग्नं वं चित्तसौख्यकं २७ निरूपयत तं
शीघ्रं येन कुर्मः प्रतिक्रियाः ऋषयऊचुः शक्रो बिभे
ति समरे याभ्यां तौ मणिमल्लकौ २८ यस्य मंत्री सुरा

चार्यैः सेनिका अमराः सदा क्षीरांभोधिसमुद्भूतो वा
हनं श्वेतकुंजरः २९ तथैवोच्चैश्रवास्तुंगस्तुरंगः सु
रसेवितः दुर्गं स्वर्गः कल्पशाखी मौक्तिकः कुसुमायु
धः ३० संभेदजनकोद्भूतः यच्चिरायुधमुत्तमं ताभ्यां
युद्धे जितः सोपि कथनीयं किमस्मिनः ३१ वेत्सि सर्वं
त्रिकालज्ञ यदुक्तं देव केशव नारायण उवाच वि
ख्यातावसुरौ घोरौ ब्रह्माराधनतत्परौ ३२ तपः प्र

भावेनतयोरज्ञेयत्वमभूत्तदा महेश्वरस्ततौ तौनो प्र
वेतांमृत्युगोचरौ ३३ वयंयूयंचकैलासंगमिष्यामो
हिजोत्तमाः तत्रविज्ञाप्यतं दैत्योहन्मस्तो मणिमल्ल
कौ ३४ इतिश्रीब्रह्मांडपुराणेक्षेत्रखंडेमल्लारि
माहात्म्येवैकुंठाभिगमनंतृतीयोध्यायः ३ सन
त्कुमार उ॰ ततस्तेमुनयःसन्नद्धामार्गानुगामिनः
दद्दृशुश्चंद्रशुभ्रांशुंकैलासंगिरिशालयं १ चंद्र

कांतोत्पलैःशुभैःसंजातामल्लशेखरं किंवा कर्पूर
पूरेण पूरितं धवलोज्वलं २ उतवा मौक्तिकैश्चूर्णितेन
प्रावरणीकृतं आमंदचंदनस्यंदस्नानमिवनिर्म
लं ३ सारितारा जनीपिष्टिः किंवा तस्यामलतिषः
पीयूषरससंधौतशिखरालिसुशोभितं ४ यत्र
स्वप्रतिबिंबानि दृष्ट्वा गाहनकुंजराः प्रमत्ता हंत
कुलिशे जेघ्नः सान्द्रनिलीलया ५ विचेरुस्तुरगा

स्तुंगाः कौमुदीमहसोज्वलाः उत्पतत्कायामिवते
समीराम्मूर्त्तिधारिणः ६ सिद्धस्तनस्यकुंडानिक
ल्पवल्लीवनाश्रये कल्पभूरुहशाखाग्रछायाछन्ना
निसर्वतः ७ चेद्रकांतशिला संघवद्धसोपानका
ध्वनि कस्तूरीहरिणाश्लेरुः कर्द्दरकदलीवने ८
चंचत्कांचनरंभास्तुस्वर्णवर्णाः फलोत्कराः आच
कर्षुः स्वपाकस्यदर्शयाजगतोदृशः ९ घनैः फलेरि

वानम्राः मातुलिंग्यः सकंटकाः वपुर्घनकुचाः कांताः
संकोगपुलकांकिताः १० फलोपहारंक्रमुकाः प्र
यच्छंतीह वर्द्धिताः सुरवर्त्मनिस्तर्पाय प्रोन्नतास्तेन
ता इव ११ नागवल्लीचलश्वात्तनारिकेलीफलोत्क
राः एलाकंकोलवल्लीनामामोदः प्रसरत्यलं १२
सदाफलरसालानां पाकवंतिफलानि च सिंदूररं
जितानीव विरेजुः परितोदिशं १३ सेवितां तापद

लनाफुल्लंग्गवलग्गावलिभूषणाः शिवाइवशिवो
ल्लासाविवमुञ्छदनद्रुमाः १४ वनकुंजरकंडूतिक
र्मणाभग्नशाखिनां देवदारुतरूणांचगंधः शैलेस
सारवे १५ तमालतरुखंडानि जीमूतपदतान्यपि
अविभक्तविवेकानि वपूंषु स्तनहूलके १६ मंदा
रतरुशाखाग्रकुसुमानि सुयौवनाः चिन्वंतिचप
लापांगः पार्वत्यायत्रसेविकाः १७ पार्यातकपरा

म.म. गोच्छपुंजपिंजरितस्तनाः हरंतिवनपालानांमुनी
१५ नांकन्यकामनः १८ रामाकराक्षसंपन्नकक्ष्मचंदन
चर्चितः इवावभौहृततरुः प्रफुल्लैःषट्पदान्वितः
१९ उत्फुल्लफुल्लनम्राणांनिधीनामिवतेजसां स्व
र्णचंपकवृक्षाणांराजंतेरत्नवेदिकाः २० प्रतिविंवि
तवृन्तानांफलौघानत्नसानुषु शुकामोघोद्यमाग्रा
सेअहोनिर्धारणात्फलं २१ शैवानांशिववृक्षाणांमुनि राम.
१५

कुंजेषुदिवानिशं भवंत्यौषधयोदीपा यत्रतैलादि
वर्जिताः २२ चंद्रकांताश्मशिखरेचंद्रमंडलवा
सिनः चेरुःकुरंग्पःसर्वत्रकुरंगस्यनिजेछया २३
कांतांगसंगसंजातपुलकस्तनमंडलाः किंनर्योम
रवृक्षाधःशैवंगायंतिसद्यशः २४ गीताकृष्टमृगी
णांचलोचनानिस्वलोचनैः उन्मिनेमुर्विनोदाय
यत्रविद्याधरांगनाः २५ सपुष्पाणांद्रुमाणांचमंदः

म.म.
१६

परिमलं वहन् निर्वाणपश्रमवतः पांथान्वा संतिकोम
हत् २६ खेलंतिमुष्टिभिः सिद्धवालिकारत्नसंचयैः
समासमविभागेन छायेत्रिदशवीरुधां २७ रेभिरे
सलिलक्रीडां यत्रविद्याधरांगनाः वापीषुकांतसहि
ताहैः स्वर्णसोपानपंक्तिषु २८ माणिक्यसानुगेषु हे
कांतगंडस्थलेषुच रूपं विलोक्यगंधर्व्वाः स्पृशंति
दशनक्षतं २९ किरातादहम्सुमार्गेसिंहानांकरि

राम.
१६

मर्हितां मुक्तावमञ्जिरनुलैः पदैः शोणनखांकुरैः ३०
चंद्रचंद्रोत्मलस्पर्शजलेस्वल्पनदीतटे अमरत्वप्रदा
नांचकुंदानामुद्भमोभवेत् ३१ अधित्यकासुतुंगासु
चमर्यश्चारुदर्शनाः विचलंतिचलत्पुच्छचामरक्षेप
विभ्रमाः ३२ वृंदानिकामधेनूनांहरिचंदनकानने
आसीनानिघनच्छायेरोमंथान्मत्रकुर्वते ३३ सुवर्ण
वर्णाःकपिलाःक्वचिन्मरकतत्विषः क्वचित्कर्पूरस

रम्भा गावोरेजुस्तत्र धूमयः ३४ स्मरंतोनन्दतुः प्राह
हू कालं समकेकिनः यत्र वल्लीतरुस्मेरकुसुमासव
सिंचनैः ३५ शुका इव कथालापान्कीराहंसाश्च को
किलाः चक्रिरे सह द्विजाश्चान्ये चंचुचलाग्रनिश्चलाः
३६ समाधिशांतहृदयं हंससन्तापसा भुवि निश्चला
इव कुंजेषु महेशालिंगरूपिणः ३७ सालकं कप
दन्मासे वैजंतीनां प्रियांतिकाः ऋजावानिव रक्ताङ्गे

ःशैलोऽस्मिन्सिद्धयोषितां ३८ विकचेष्वरसालेषु म
करंदप्रवर्त्तिषु काकलीचंचरीकाणांजहारयमिनां
मनः ३९ तंदृष्ट्वा शैलममलंविमलीकृतमानसाः स
भामालोकयांचक्रुस्स्वक्रिणायोजितांद्विजाः ४०
इतिश्रीब्रह्मांडपुराणेक्षेत्रखंडेमल्लारिमाहा
त्म्ये कैलासगमनंचतुर्थोऽध्यायः ४ सनत्कुमार
उ. ददृशुस्तेसभांशंभोर्याकृताविश्वकर्मणा शी

लाभिरत्नरूपाभिः कांचनाद्यैः सचंदनैः १ लसत्सिं
हावलीयत्ररचिता प्रथमास्तरे ततः किंनरपत्राली
ततो युद्धध्वजावली २ ततस्तुरंगपंक्तिः स्यात्तत्रव
स्त्रीविलासनं ततः कमलबंधश्च रत्नबंधस्ततोपरि
३ निस्तरान्शाणललितान्सोमकांतमयास्तरान्
निर्मायसप्तरचिताश्चकांचनभूमिकाः ४ मु
क्तासुधाधवलिताभिन्नयस्फटिकत्विषः मानि

क्यबद्धसोपानमार्गाःशुद्धयांकिताः ५ इंद्रनी
लोपरिस्तंभोपरिस्तंभारविप्रभाः पद्मरागकृतो
न्नालाःकुलिशाग्रग्रहणानिच ६ जाग्रत्प्रभापुष्परा
गचतुःपट्टिकसंहताः दंडाःप्रचंडाश्चंडांशुद्दृषत्से
त्रखंडैर्विनिर्मिताः ७ पद्मरागसलाकाभिर्वेलिभि
र्यत्रशोभते इंद्रनीलकृताःसार्यामुक्तास्तबकसुंद
राः ८ नीराजनकृतोद्योगाःसौवर्णाःशालभंजि

ताः कर्पूरपात्रविन्यस्तारत्नदीपानिरंतरं ९ इत्यादि
सप्तभूमीनां शेखरे कनकोद्भवः कलशः सूर्यतेज
स्वीपताकाचलवीजितः १० यस्मांदेवगुरुर्वक्ताक
विर्दैत्यगुरुः स्वयं सकलानांकलानांचज्ञाताविद्धि
बुद्धेधः ११ शिवस्यमान्यः शिरसा सर्वज्ञस्यकलानि
धिः जगन्निर्वीवकर्तंहि गुणाः सर्वत्रपूज्यते १२ उ
पतस्थुर्महेशस्यहगंचलमतंद्रिताः रूपवंतोनिमा

मुख्याः किंकरयेश्वसिद्धयः १३ मरुतो वसवो रुद्राः
सिद्धविद्याधरादयः कुबेरप्रमुखा यक्षा हाहाहूद्याः
सुरगायकाः १४ एकाग्रमनसो नित्यं नारदाद्याः सु
रर्षयः तुंबरप्रमुखाश्चान्ये गीतज्ञाः परितोषकाः
१५ तिलोत्तमाद्यास्तारुण्यभरस्फारमदोद्धताः वी
क्ष्यं तेन त्वसमयं समुदायैर्निजैर्वृताः १६ निधयः
शंखपद्माद्याः कुंदाद्या मूर्त्तिधारिणाः सेवंतेस्मलि

नोद्दृष्टिंप्रक्षीहृतमनोंभुजाः १७ इंद्रःसिंहासनासी
नंस्वामिनंप्रणनामच सहस्रदृष्टिपातेनकरांभोज
गदीश्वरं १८ ज्वालारोमांकुरःशीतइवधातांकुला
चलः उपतस्थेशिवंयत्नरूपधारीधनंजयः १९ दंष्ट्रा
करालवदनःप्रज्वलद्वह्निलोचनः नमस्करोतिभूते
शंहृतांतःशांतमानसः २० विकोशकरवालेनदिव्यमु
ष्टिश्रैनैर्ऋतः प्रक्षीहृत दिशानित्यमुपास्तेचंद्रशेखरं

अंगनेपरमेशस्यसेकसंमार्ज्जनादिकं स्थीयनेकुर्व
नाद्दास्यंचरमाचलमभुज्जा: २२ रक्षोरुद्रेगतःप्रा
णःसम्भाजिरगनंक्षणात् समरुच्चंडद्रुहउस्ययत्र
किंकरतांगतः २३ निधीन्सर्वान्सुरस्तत्वकुबेरोभै
रिकींश्रियं स्थायलोचनंशंभोःपर्युपास्तेषुभक्तिम
न् २४ मार्त्तंडश्चंडकिरणइवलोकसुखप्रदः स्व
र्गाप्रसंनयायत्रभजतेपार्वतीपतिं २५ स्थितो

म.मा.
२१

पिशेश्वरेशंभोः कलयामूर्त्तिमान्शशी हंदेवंदार
कानांच समवेसेवन्ते शिवं २६ नंदयंतिसुराः केचि
न्नित्यंसदसिशूलिनः स्वेदक्लांतमपनोदाय प्रलंब
व्यंजनानिलं २७ सुगंधद्रव्यसंपूर्णांस्त्रिदशानांक
रस्थिताः नर्तंतिसौरभंधूपंज्वलंत्योदीपवर्त्तयः
२८ धारागृहगलद्वारिसीकराश्चंद्रिकोज्वलाः नि
र्वापयंतिस्त्यांग्रीष्ममध्यदेशस्थितान्सुरान् २९ उ

राम.
२१

त्नमानिसुरत्नानिदीप्तिमंतिमहांतिच विनानस्था
नसुध्यानिजज्वलुर्यत्रसुंदरे ३० इतिश्रीब्रह्मां
डपुराणेक्षेत्रखंडेमल्लारिमाहात्म्येशिवसभावर्ण
नंपंचमोध्यायः ५ सनत्कुमारउ० दृष्ट्वातेब्रह्मणाः
शंभोसंसदंरत्ननिर्मितां विस्मयंबहुलंजग्मुःकला
वह्निनिषेवितां १ ततस्तेभोगपसंरंभैःसभायामभ
यप्रदः दृष्टःकपर्दीभगवांश्शृणुध्वंतद्द्विजोत्तमाः

येनस्मृतेनभवतां दुःखोपहतचेतसां कलिकालाभि
भूतानामानंदोजायतेहृदि ३ द्वात्रिंशत्सिंहकलि
तेरत्नपंक्तिविराजिते जांबूनदसुवर्णेनघटितेनि
र्मलेमले ४ नानाप्रभासमाकीर्णेविद्युत्पुंजोज्ज्वल
त्विषि मरालगलतूलौघतूलिकोत्तरसुछदे ५ स
मासीनंशिवंसाक्षाद्ददृशुश्चर्मचक्षुषः धर्मस्यपुत्रा
स्तेसन्नपूर्वपुण्यफलोदयात् ६ कुंदेंदुचक्रिका

चक्रकाश्मीरमहसाऽच्चयं पुण्यराशिमिवोत्तुंग
मुत्तुंगस्फटिकोपमं नानाचरित्रशैयसामु[illegible]छायो
पमितं शिरः क्षुब्धक्षीराब्धिकल्लोलमालास्नातमि
वामलं ८ गोक्षीरधामधवलं धवलांभोजपूजितं
लेपितं चंदनेनैव कर्पूरपुलकांकितं ९ वीतरागानु
रागाणां विराजेते निधी इव सरागे यस्य देवस्य चंच
च्चरणयोस्तले १० सर्वलक्षणसंपूर्णे लक्षणानिग

म.मा
२३

त्तस्यैव आरक्तांभोजदर्पौघदलनेशोकसुंदरे ११ न
मोस्मिमनसस्थानि विनियंति प्रमाणतः पादयोर्य
स्यनमतां नखेचंद्रमहाशवः १२ कालव्यालमिषेणै
वराजते यस्यतोऽडरे विश्वग्रासोत्सुकः कालश्चरणेक
रकाकृतिः १३ आसनं वद्धपर्यंकस्वस्तिकं स्वास्तिदा
यकं सम्यग्विलोक्यमानानां शंभोर्यस्य विराजते १४
व्याघ्राजिनपरीधानं भुजंगेनहृदीकृतं ध्यायतां का

राम.
२३

मथमनं देवानां यस्य सेविनां १५ नाभिनासुंदरं तुंगं
नो गंभीरेण महोहरं वलियत्रविलासेन यस्य विश्वाव
काशकृत १६ नाभिहृदतटोल्लासानंदवल्लीव सुंदर
यस्य हृन्मंडपं याति रोमराजी विराजते १७ राजतंनि
र्मितं यस्य सुविशालमुरस्थलं पार्वतीप्रेममंजूषाक
पाटमिव राजते १८ त्रिशूलं डमरुं खड्गं पानपात्रं शरा
सनं षड्ंगं वाणसहितं परशुं मृगमंकुशं १९ दश

युधानियस्यैवंविलसंतिकपर्दिन दोर्दंडेषुप्रचंडेषु
चंडाहिवलयेषुच २० अंभोरुहाणांपंचानामेकना
लइवास्थितः विभातिभक्तवात्सल्याद्यस्यकालगि
लत्किलः २१ प्रालेयमुद्दमीशस्यकंदर्पदहनोद्यतं
लोचनत्रितयंयस्यपश्चिमाननमुत्तमं २२ गौरंस्व
तिलकंपांडुगांडंप्रहसितंमुखं औत्तरंयस्यदेवस्य
वक्त्रंकमलसंनिभं २३ कल्पांतज्वलितज्वालातडि

त्पुंजप्रभाहरणं इंदुगंगासटासर्पैः पूर्वं चक्रंविराजते
२४ नीलजीमूतशंकाशंज्वलदंष्ट्रंसुभैरवं सर्पोग्रो
त्तकपालालिशेखरंदक्षिणंमुखं २५ व्यक्ताव्यक्तं
गुणातीतंसगुणंलक्षणान्वितं पंचमंवदनंयस्य
तडिन्मालाकुलंयथा २६ यस्यदेवस्यवामांगसं
गिनीतुहिनाद्रिजाः दिव्यरत्नमनेकंचतत्प्रभवेष्ट
तिष्ठातिया २७ यस्यामंगलसूत्रस्यवलेनगरलं

पयो कांतः कालकलोल्लीलंतै लोकग्रासससाहसं
रतिकं दर्प्पयोश्चित्तपक्षेपमांबरद्युती तलेचरण
योर्यस्याः सानुरागेइवानिशं २९ मंजीरसिंजितं य
स्याः पादयोर्विरुदावलिः वाग्विलासायतनुते नि
जं माधुर्येनामिव ३० बंधूकपाटलालक्तदाडि
मीकुसुमोपमं उवासवसनं देवियासंध्यारागसं
निभं ३१ पीनोत्तुंगेकुचतटेकंचुकं कांचनप्रभं

ष्णांङ्गगारमिवोन्नानं यस्याः कंदर्पसूनुजाः ३२
ग्रीवाविलासलतिकाराजते मौक्तिकावलिः सौं
दर्यस्तवं कांदर्प वदनस्तनयोरिव ३४ नानारत्न
समुच्छ्रायविस्फार्यकिरणावलिः यस्याग्रैवेयकं
भाति निदानमिव तेजसाः ३४ यस्याः कनकता
टंकेनेमिमुक्ताफलानि च अनंगवक्त्रनिपतन्म
नांसीव यत्नात्मनां ३५ वदनेमदनोल्लासात्मस्याः

कालयितुं शिवः नयनानि वह्न्येव बभार जगतां
पतिः ३६ विंबे यदि स्याच्छशिनो नीलोत्पलदलद्वयं
तदोपानयनयोस्तस्याः स्याच्चारुचक्षुषः ३७ य
दिशोक्रस्य विंबस्य कनकांभोजमासनं भवेन्नासा
मणेस्तस्याः सा हृद्रूपं चंपकत्विषः ३८ मुखं चंद्राम
नस्येव धारादंतोज्वलत्विषः यस्या शिवचकोराय रा
जते धरपल्लवः ३९ उन्नतांगैरिवाकीर्णकालिंद्यानी

लमाहतं यस्याः करांक्षविक्षेपैरप्यूत्थतिदिशं न

भः ४० अष्टमीचंद्रसदृशं ललाटं प्रतिभासते ज्ञा

वद्धकार्मुकाकारं यस्याः कुसुमधन्विनः ४१ मालती

कालिकागर्भैर्गुजितैर्भ्रमरावलिः लक्ष्यते लक्षणो

पेतैर्यस्याश्चिकुरपिंजरे ४२ अगाधेस्मिन्सुधासिं

धौ गंगेवैकसुखी शिवा शिवेमिलतु शमयीरोमां

चैः पुलकांकितैः ४३ विद्याविद्याधरैर्वेद्या देवाना

म.मा.
२७

मधिदेवता जन्ममंदिरमध्यस्थस्थाणोमाशाल
भंजिका ४४ या चैतन्मकुलाविश्वरूपिणः परमेष्टि
नु नित्यासत्यास्वयं मायामोहिनीलीलया शिवा ४५
नयान्वितं शिवं दृष्ट्वा हृष्टा नत्वा मुनीश्वराः पेतुर्मे
दंडवद्भूमौ वाष्पपूरितलोचनाः ४६ उत्थापिताः स्कं
गिणा ते पृष्टाः के यूयमित्यपि विप्राः प्रवेशिनास्व
र्णवेत्रहस्तेन नंदिना ४७ इति श्री ब्रह्मांडपुराणे राम २७

सेत्र खंडे म० शिवमूर्त्तिवर्णनं षष्ठोध्यायः ६
सनत्कुमार उ० अथते मुनयः सर्व्वे हृष्टानंगिरिजापतिं
स्तोत्रं प्रचक्रुर्भावेन स्तोत्रेण जगतां विभोः १ ऋषय
ऊं० नमोस्तुते महादेव नमस्ते जगदीश्वर नमोस्तुते
जटाजूटसंराजच्छंद्रक्षपण २ नमो रुद्राय महते न
मस्ते गिरिजाप्रिय नमस्ते जगतां नाथ नमस्ते भक्त
वत्सल नमस्ते देवदेवेश नमस्ते लोकपालक नम

स्तेजगदाधारनमस्तेवरदेश्वर ४ नमस्ते भक्तभक्ते
शनमस्ते भक्तभावन नमस्त्रिपुरहंत्रेचनमस्तेत्रिद
शेश्वर ५ नमस्तेस्तु ज्ञानदात्रेनमस्तेनागभूषण
नमस्तेदेवविदुषेनमस्तेवेदधारिणे ६ नमस्तेभूत
दमननमस्तेसुरमर्द्दन नमस्तेजगदाधारनमस्ते
जगतांप्रिय ७ नमःपिनाकहस्तायनमस्तेकृत्ति
वासने नमोऋषिगणाध्यक्षनमस्तेमुनिसत्प्रिय

नमस्तेमुनिपालायनमस्तेमुनिसंश्रय नमस्तेवर
देशायनमस्तेधर्मपालक ९ नमस्तेधर्मकर्तॄणां
मार्गदेशकरप्रभो नमस्तेस्तुतपःप्राप्यनमस्तेता
पसप्रिय। १० नमस्तपोनिधानायनमःपालयतेन
मः सृष्टिस्थितिविनाशानां कर्त्रे तुभ्यं नमोनमः
११ सभामध्यगतां दृष्ट्वा विह्वलीकृतचेतसः उवा
चब्राह्मणान्शंभुः केनयूयं सुदुःखिताः १२ स

षयउः मणिमल्लो महादैत्यो मणिशैलाधिवासि
नो १३ ब्रह्माणंतपसाराध्य तावज्ञेयत्वमागतो
नवध्यो पंचवक्त्रेण चतुर्वक्त्रेण वाक्कचित् षण्मु
खेनदशास्येन दशवाहुवनापिच्वा १४ सहस्रबा
हुना वापिदेवधुर्येण केनचित् राक्षसेनापिमनु
जैःसिद्धविद्याधरादिभिः १५ वरदानबलोन्मत्तो
दुर्मदो हृष्टमानसो नाम्नां महीतले राज्यंक्रियते

लोकपीडनं १६ याभ्यां बिभेति शक्रोपि नृपाणां
तत्र का कथा ऋषीणामाश्रमाः सर्वे विध्वस्तास्तेन
पीडिताः १७ उन्मूलितानि लिंगानि स्वयंभूनि वि
नोदतः जलतीर्थेषु रम्येषु विचेरुः कुंजरास्तयोः
१८ तयोरनुचरैः स्वर्गे केशाकर्षणविह्वलाः दि
व्यासुरविनासिन्योप्सरसः प्रापय्य भूतले १९ पा
नकेलिविनाशाय प्रेमपात्रं मरुत्वतः आनीतमम

रावत्तांमेनकाख्यांमनोरसं २० प्रत्यहंनंदनोद्या
नांतंतुष्टैःकुसुमानिव पारिजातस्यमघवाप्रस्था
पयन्निनइयात् २१ आसवायघटीवेद्धास्तन्द्
तैःकल्पशाखिनांदानव्यंकल्पितंगैर्हिसुधुदुग्ध
मध्यापिवा २२ निक्षेपितःसुरमणिःकिंचित्काले
मरुत्वता भंभारवाख्यैवैकुंठंसुराणांसुरभिर्ययौ
२३ पीयूषरसपूर्णानिस्वर्णवर्णानितत्पयः अत

पयंति सुत्रामाशीत्याभीताफलानिच २४ य
त्किंचिनागलोकेस्मिंनश्चैववस्तुसुंदरं भोग्यंत
योर्विभोगायशक्रःप्रापयंतिक्षणात्‌ २५ अग्नि
स्तयोःप्रतापेनदाहभीतइवानिशं सकंपमानहृ
दयःस्वांपुरीमधितिष्ठति २६ विश्वसंहारसि
कःकृतांतःशासनांतयोः नविभर्तिकरेदंडंचं
डविक्रममंडलं २७ कोणेशःकोणेयोज्ञाति

म.मा. ३१ माचाभावेनगोचरं दानादानादिकं प्रेमतनुतेसत
ततयोः २८ वरुणो वारुणी प्रांत इव भीत्यैव वेप
ते शिरसावंद्यते सम्पत्कदादेशविचेष्टितं २९ स
र्वदासर्वगो वायुस्तत्कांतासुरतश्रमं हरते स्वल्प
भावेन भयात्काश्यपेनुपागतः ३० संप्रापयति य
क्षेसः प्रीत्यैव भयगर्भया नृत्यगीतेषु चतुराः का
मिनी रलकापुरात्र ३१ माणिक्यादीनि रत्नानि राम. ३१

चिंतामणिसमानिच ददात्यब्धिः किमाश्चर्यं
यथोरिड्डोपिसेवकः ३२ नपोव्ययभयादेतांन
शपंतिमुनीश्वराः श्रुनिदंडाहते शौचहानिः किं
नैवजायते ३३ नयोमुच्यस्तुमल्लाप्यः समदोति
प्रतापवान् आश्रमांनः समभ्येत्यनानाद्दुःखंन
दाकरोत् ३४ सर्वज्ञः सर्वदर्शीस्त्वं यद्दृत्तंतंनवे
त्सिकिं सर्वथापीडितास्तेनस्त्वयिस्वामिन्यनाथ

वन् कथयामः कथंदेवत्वं त्वार्तदोषदंडयोः तेषा
मितिवचः श्रुत्वा शिवो वचनमब्रवीत् ३६ श्रीशि
वउ॰ महता ब्राह्मणा दुष्ट कर्मणाभिगतायुषा
भग्नास्तेन मनोरमारुद्रहंसस्य पंजराः ३७ प्रथ
मा मम मह्णेन कालसर्पस्य पेटिका विप्रालोल्प
वशेनैव मूषकेनक्षतायुषा ३८ दैत्याधर्मग्रस्ता
मीति सा इहासंसमुत्थितः जराः संत्रोरयामा

सफटाटोपहताभुवि ३९ अजायतमहामारीदी
प्तदावानलप्रभा सिक्तातेमुनिभिर्दीप्तैश्चरोःशे
षेण सर्पिषा ४० ततःसा घृतमारीति नामधेय
मुपागमत् दंष्ट्राकरालवदनजिह्वाललनभीष
णा ४१ नानायुधधरा तुग्रा शान्तभैरवनादिनी ज्वा
लाशिखेवकल्पाग्निर्वेष्टि नाम्भुवनत्रये ४१ इ
ति श्री ब्रह्मांडपु० सप्तमोध्यायः ७ सनत्कुमारउ॰

शृणुध्वं ब्राह्मणास्सर्वं कलिसंतप्तमानसाः कलेः
सिद्धिप्रदं नृणां भक्त्या यत्स्वल्पयापि वा १ मार्तंड
भैरवं रूपं बभार सहसा विभुः महाहिबलयोप
येः चंद्रमार्तंडकुंडलं २ डमरुत्रिशूलसहितं ख
ड्गपात्रसुशोभितं तप्तकांचनसंकाशं मुंडमालासु
शोभितं खड्गदुशेखरं त्र्यक्षं महामुकुटमंडितं
माणिक्यपंक्तिसदृशं दशनावलिशोभितं ४ व

संतखेलनोद्भूतरजनीचूर्णगुंठितं तापिछछवि
पिछालिचलच्चामरवीजितं ५ उत्तुंगस्तनसंभा
रनम्रणीकरपल्लवैः क्षुध्यमानमहारावसारमेय
समाकुलं ६ सप्तकोटिगणाकीर्णंपिशाचावलि
पालकं एवमास्थायतद्रूपंतेजसातीवभास्वरं ७
सूर्यकोटिप्रतीकाशंचंद्रकोटिसमप्रभं आ
दिदेशसुरान्सर्वान्नियोतसमरोद्धुराः शस्त्रैरस्त्रैः

समायुक्तावाहनैस्तैरलंकृताः सन्नाहैर्वज्रकव
चैस्तडिद्दीप्तिसमप्रभैः ९ अथतेत्रिदशाः सर्वेनि
जसेनाभिरावृताः सैनिकाः समरानंदसंदोहमे
दुरावभुः १० उपत्यकासुकैलासगिरेः सुसमभू
मिषु तेषांसेनाःपृथक्स्वामीदर्शयामासशूलिनः
आरूढस्यवृषस्कंधे क्रोधज्वलितचक्षुषः मयू
रचामरस्फारप्रभामुकुटशोभिनः १२ स्तुत्वा

श्रु मंडलाकारधवलछत्रसेविनः प्राक्प्रतापय
शः पार्श्वेदीजनंतुतस्यच १३ स्कंदउवाच मयूर
वाहनादेवाः शक्तिकुंतायुधोद्यताः उल्लसंनीलसं
नाहावीरास्तेममसैनिकाः १४ आदिगंतंगजारू
ढाः स्फूर्जत्कुलिशशोभिताः शोभनेपल्लवछत्रैर्दे
वेंद्रस्यचमहारियं १५ गतेर्विलासंकुर्वंतितुरंगाः सा
दिनोदिताः मनोरथमयंयत्रसासेनावज्रिणोपरा

शक्तिशस्त्रज्वलद्दीप्तिर्वाहिनी मेषवाहिनी दावदी
प्ताद्रिसंकाशा देवेयं जातवेदसः १७ गलघंटालु
लालोलनादसैरिभभास्वरा प्रचंडोद्दंडदोर्दंडदंडा
सेनेयं यामिनीविभो १८ दंष्ट्राकरालवदनं क्रव्या
दवलमुत्कटं दर्पधारावलीखड्गं देवनैर्ऋतमाश्रि
तं १९ ज्वलत्पाशावलीहस्ता वारुणीयमनीकिनी
कुंकुमारुणनासीरा राजते चंद्रशेखर २० ध्वज

पल्लवच्छन्नासेनेयंतानवायवी ध्वजायुधामहा
घोरामम राज्ञास्फुरारुणा २१ चंचत्कांचनसंनाहा
कांचनछत्रभूषिता स्वर्णोदग्रांकुशैर्भातिसेनेयं
नारवाहिनी २२ यत्रोद्दुरुमुखावाहा गजारूढायत्र
सादिनः दीप्तांकुशकुठारश्रीर्लंबोदरचमूरियं
२३ मृगारूढास्फुरगायत्रछत्राणिधवलानिच चम
राणिप्रभावंतिसाचाईशबलाचमूः २४ स्पंदनाः

सप्ततुरगास्कन्दिन्माल्लोलसत्प्रभाः उल्लोलछत्रस
न्नाह हरिदश्वस्यसाचमूः २५ हंसाः कांतिमयोत्तुं
गास्तुरंगायत्रकुंजराः अब्जयोनेरियंसेनाकमंड
लुलसध्वजा २६ नीलमेघांजनछायसंनाहाशं
खचक्रिणी देवपीतांबरछन्नासेनागारुडवाहिनी
२७ शूलखड्गांगहस्तेयं गजचर्मपरिछदा सेनेयं
शांभवीशंभोर्लोचनत्रयभूषिता २८ इतिदर्शयति

स्कंदे क्रोधान्मल्लवधोद्यतः मार्त्तंडभैरवः शीघ्रं ययौ
मणिमयाचलं २९ वलांतिरौद्र वेतालाष्ट नाप्रेता
श्च डामराः शाकिन्यो मातरोत्युग्रा नानायुधकरो
द्यताः ३० त्समतखड्गहस्ताश्चाः केचिन्मुशलपा
णयः चलच्छक्तिकराः केचित्केचित्परशुधारिणः
३१ त्रिशूलतल्लनोत्साहाः केचित्खांगलपाणयः
शोभिता भुजगैः केचित्केचित्तुंगगदाधराः ३२ के

चिल्लोहार्गलस्कंधाश्च कचालनतत्पराः शंखच
क्रहताः केचित्कालदंडास्त्रमंडिताः ३३ केचिच्च
शावराभिल्लाः कुंतपट्टिशधारिणः धनुर्बाणधराः
केचिद्भिंडमालाकरोद्यताः ३४ चर्मखड्गधराश्चा
न्ये खेटकुंतामहाबलाः मुद्गरान्भ्रामयंत्येके केचि
त्कंकणदंडकान् नाभित्तुंत्तुप्रलंबोष्ठादंष्ट्रालंब
नवक्षसः केचित्पंचनयना व्याघ्रंफास्याश्च केचन

केचिद्धिस्तनसिंहास्याः केचिद्द्विगाः षडाननाः शुंडा
नासावक्रतुंडाश्चत्रिशीर्षाः सप्तशीर्षकाः २७ षड्हस्ता
ष्टकराः केचिद्विलंविहस्तकुंडलाः ललाटस्थशृंगवि
हस्ताः किचिद्विशालविलोचनाः २८ केचिद्दुर्घैरिकाव
क्त्रानाभिस्थग्रसनांचलाः तिर्यक्चक्षुरुच्चैस्तारोपाज
राक्षशृंगयष्टयः २९ केचिदूर्ध्वपदः शीर्षकरयो
नामहोत्कराः केचिन्नीलाननाः केचिद्वक्रांगादं

नुराननाः ४० केचिदूर्ध्वकराः क्रूराः केचिद्दीप्तविलो
चनाः मुंडमालाधराः केचित्केचित्कर्णावृताननाः
४१ केचिद्गलंडभूषांगाववल्गुः सत्वसंभ्रमाः महा
मान्यामहोत्साहा महादेवात्मजा इव ४२ त्रिसप्तन
वजिह्वाश्च पंचसप्तदशाधराः चतुष्कर्णास्त्रिकर्णाश्च
ज्वालास्याः पंचतुंदिलाः ४३ वाद्यत्संग्राममुरजाध्व
निनाद्व्योमपूरयन् रणदुंदुभयो ढक्कानिस्वना घनघो

षिणः ४४ उद्घोषारणकंकालारणतालाःस्तुनादिनः
जयघंटादिवाद्यानियुगपद्दध्वनुस्तदा ४५ रेणुश्च
रणमोहर्येजिघ्रभुर्द्दूभेरयः सस्वनुर्येद्दकांसोलाश्च
क्कणूरणघोलकाः ४६ तथापिनाकवाद्यानिजगर्ज्जु
र्डिंडिमादयः ववदुर्दीर्घशृंगाणितस्तनुःपटहादयः
४७ गगनंप्राप्तहैतैर्हतंभातिनानावर्णध्वजांचलैःस्फु
लिनःक्रोधवीरस्पवितानमिवविस्तृतं ४८ स्तुत्वैर्मै

म.म.
३९

ईडुसुवीराणांचामरैस्स्वर्णदंडकैः चंद्रिकास्फुरितंव्यो
मन्तदास्फुरद्रजनीविना ४९ शिरःस्तुरस्थिनांतद्वत्करि
स्कंधाधिरोहिणां चलन्मयूरकुंचानांदीप्याम्रम
मभ्रहूनं ५० नमत्फणिफटाटोपात्पृथिवीमज्जने
न्मुखी वराहदंष्ट्राफंगंचचानुगस्फारनः ५१ से
नाघोषेणदुग्धाब्धिःक्षुभितोमधुसूदनः नेनजा
गरयांचक्रेशेषपर्यायकशायिनः ५२ जंगमाविर

राम.
३९

योनीलाइवधावंतिकुंजराः महावदंकुशान्तुग्रान
प्यमदोद्धताः ५३ तत्रतेषामपन्मार्गेमदासारनरं
गिह्मिं तांचतेरुद्धयाः सादियुक्तायेयुद्धरंहसः ५४
स्तुभ्याह्वाहरवुराघातैश्चूर्णीभूतारमरेणवः घर्षणो
श्चक्रनेमीनामस्पष्टान्दिवमध्वनि ५५ इत्यस्वल्पव
लोपेतंश्रीमन्मार्तंडभैरवं विलोक्यानुचरामल्लंकथ
यामासुरातुराः ५६ इतिश्री ब्रह्मांडपु॰ मल्ला॰ क्षेत्रखं॰

अष्टमोध्यायः ८ सनत्कुमार उ० अथागते महेश
स्य सैन्यं सर्वं दिगंतरात् असंख्येयमनाख्येयं दीप्तशस्त्रा
वलीवृतं १ इति तं कथयामास दैत्यानामधिपेश्वरं म
हांतस्यासुरेंद्रस्य दूता विभ्रांतचेतसः २ महासुर उ०
कोसौ महेश्वरः किं सैन्यं दर्पेण सन्हृद्धिमान् यस्याश्रा
वरणं चर्मभूषणानि भुजंगमाः ३ इति चिंतयते वै
रं कोयं कथयतालं रे दूता हननं तैर्हि विपरीतार्थमा राम.

षणं ४ सुहृदाममहस्याद्रिः कैलाशोस्तुजपंजरे नि
धायांदोलितस्तस्यबलंमत्सुरतः कथं ५ अथासौ
लीलयोन्निष्टतुतुंगशिखरंगतः तस्मादालोकया
मासशंकोः सैन्यंसदैत्यराट ६ तंदृष्टुं तर्भयोदैत्यः
शूराणांदत्तवानाज्ञानू सुराहंनायशूरायददावैरा
वतंगजं ७ निर्ज्जरध्वंसिनेवैरिसेनाकोलाहलाभि
धं विद्युत्पातायशकटंचतुर्वाजिविराजितं ८ उद्ध

तायपचमल्लायचतुर्दंतंमहागजं देवशल्यायवी
रायददौसुरपतिंगजं ९ तस्मैचवाचित्रांगोदत्तःका
श्मीरसहूपुः रत्नकांचनपर्याणसेराजन्स्वछमंडलः
१० कुंजरंसैरिभास्यायहिमवंतंमहागजं इंद्रगो
पंतुरंगंचचतुश्चामरसेवितं ११ सुरेंद्रदर्पदलनोब
द्धनां राक्षसांपतिः तस्मैकर्पूरतिलकंवाजिनंच
गजाधिपं १२ चामराणिप्रभावंतिसंनाहंस्सूर्यते

जसं वैरिदर्पहरं खड्गं हस्तिनं जयमंगलं अश्वं चंड्रां
शुसंनाहं मल्लं निजकरेस्थितं १४ नरविध्वंसिका
येष्मंकस्तूरीकवचाभिधं नंदनोद्यानदलनं कुंजरं
चमहामदं १५ वाहैश्चतुर्भिः संयुक्तं पद्मरागसम
प्रभैः कांबोजैश्चंडकोपायरथं चविजयध्वजं १६
सिंधुनादायमन्नालिमालाव्याकुलितानन प्राकसं
ग्रामममहासौर्यपरितोषेण सुंदरं १७ इंद्रनीलप्र

क्षावाहाः शिबिरं कनकप्रभं यस्मात्तं स्यंदनवरं प्राय
च्छन्नो मुखोयव १८ यत्र सिंदूरवर्णाश्वाः श्यामकं-
र्णा मनुजवाः तं रथं धूम्रवर्णाय गजं नीलगिरिंद
दो १९ उल्लसं नीलमकरं स्वर्णवर्णाश्च भूषितं ह्र
स्मध्वजं रथं स्तूपकर्णाय यस्मनरं तदा २० ज्वालामु
खः शूलजिह्वः सुरारिः सुरसूदनः करालः पावका
क्षश्च शक्तिंदंतः प्रतापवान् २१ भीमाक्षो भीषण

मुखोदेवमल्लोवुधांतकः निर्जरारिर्गजमुखोरक्तोक्ष
स्त्रिदशार्द्दनः २२ कालध्वंसीकुंभनासः सिंहनादोम
दांतकः खरानननः खरमुखेर्खिनेः खररोमाखरांघ्रियुक्
२३ ऊर्ध्वकेशः सप्तबाहुर्नैरवक्त्रश्चतुर्भुजः हलदंतः
क्रूरदृष्टिलांगलीकरफानन २४ चक्रदंतः खरन
खः खड्गकेशः सुरासनः अस्तिजिह्वः कुंतजिह्वः कूर्म
कर्णस्त्रिलोचनः २५ उदयारम्भोदृढमुखश्चामरश्म

श्रुरुंनतः व्याघ्रांघ्रिर्दुर्दुरो दुष्टः स्थूलरोमाविनाशनः
त्रिनासः सप्तरसनस्त्रिशिराश्च चतुःशिराः विद्युत्केशो
ज्वलद्दंष्ट्रो व्याघ्रवक्त्रः सुदुर्मतिः २७ दुर्मुखः शारभा
कारः पवित्राशी हहटाटः नडिनकर्णः क्रोधमूर्तिः पा
लकर्णः प्रमोटनः २८ सिंहनादः क्रूरनादः खरनादो
ह्रवहेषितः भ्रुंडाहस्तः क्रोधहस्तस्तडिद्वर्णस्त्रिपाद्व
ली २९ नीलाननस्त्रिंजिरांगस्त्रिकर्णश्चंडविक्र

मः श्वेतोदरः शतास्यश्च धूम्राशीवीरखादनः ३० सु
ग्रीवः शृंखलाहस्तः स्थूलग्रीवः शिवारुतः क्रोधमू
र्त्तिर्महामूर्त्तिर्नभोमूर्त्तिर्मदोत्कटः ३१ इत्याद्यनेक
दैत्यौघान्वाजिकुंजरचामरैः कर्प्पूरशस्त्रसन्नाहैः प्रि
यवाक्यसुदक्षिणैः ३२ वस्त्रालंकृतितांबूलैर्मोह
यामास तत्क्षणात् आदिदेश ततः सर्वान्नियातलघु
संगरे ३३ स्वयमारुह्य चोत्तुंगसहस्राक्षं महारथं

म.मा.
४४

सर्वशास्त्रास्त्रसंहर्ता मंत्रयंत्रविधानवित् ३४ क्षणांम
क्षात्सुरोद्देत्यस्तेजसा दीर्घितो वभौ निर्वाणसमये प्रा
न्नः प्रदीप इव दुःसहः ३५ तद्दृष्ट्वा मणिदेत्येशः कुंजर
स्कंधलालितः चलंचामरखंडानि यदुद्देशे लसंति
च ३६ तत्सेनावाद्यनिर्घोषैः क्षुभितास्तोयराशयः वे
मुर्जैळत्तुरंगालिमिखिणसहसा तदा ३७ उछलंतुंग
सलिलप्रकाशइत्तजातयः आलिलिंगहरेःकंठंल

राम.
४४

क्ष्मीर्दुग्धा बुद्धिस्थिता ३९ आरक्तनीलपीताभैश्छत्रै
राभूरितं नभः सिंहनादैश्च दैत्यानां प्रतिशब्दैर्महीध्र
नां ३९ शिवराणि जहुस्तेषां सहसा वासलालसाः उ
द्विजिता किंनरास्ते सेनाघोषैर्दिवं ययुः ४० इति
श्रीब्रह्मांडपु० म० क्षेत्रखंडे दैत्यचमूनिर्गमो नवमोध्या
यः ९ सनत्कुमार उ० शृणुध्वं ब्राह्मणा दुष्टकलि
कालमलापहं चिरं चरित्रं मल्लारेः श्रोतृणां मंगलप्रदं
ग

मा.मा.
४५

सप्तकोटिगणाकीर्णो देवो मार्त्तंडभैरवः तत्सेनाधि
कसैन्येन मल्लोदैत्यः परीवृतः २ तेषेणानेमहासैन्ये
मीलितेतुपरस्परं सिंहनादैश्चवीराणांस्फुत्तलंवधि
रीकृतं ३ मिथोमकरतुंडानां संघघट्टशिरांसिच
फेलुरांदोलयामासुर्ध्वजानामुन्नतानांचलाः ४ लला
टपदाग्रमिलत्कुंजराणांसमंततः आचकर्षुर्महा
वंताः स्वांकुशैरंकुशैर्मिथः ५ योधाः कुंतैश्चशूले

राम.
४५

श्वताडयामासुरद्भुतं स्वैरंकुर्वंकचक्रांता अन्योन्य
मत्तुलोत्सवा ६ शुंडादंडान्कुंजराणां निजघ्नुःकर
वालतः नाडीर्वीमकराग्रेण धाराधराहताशयाः ७
चचालगोलैर्लीलाया यःकालोबालइवाजिगः कल्पां
तइवतत्रासीत्संग्रामेविश्वभीषणे ८ मिलत्कपोलनि
नदैःकुंजरैःकुंकुमारुणैः रणत्कारैश्चशस्त्राणांभीष
णांव्याकुलात्मनां ९ विचिकेरुर्विस्फुलिंगाःशस्त्रसं

घट्टसंभवाः रणांगणे रक्तैः कीर्णैः खद्योता इव ते निशीः
१० ववर्षुः समरे योधाः शास्त्रधारा इवांबुदाः कुंजरस्कं
धसंरूढाः कालसंनाहसंवृताः ११ निजघ्नुः सादयाः
साक्षीन्मल्लैः खड्गैर्भुशुंडिभिः चक्रिकामुष्टियोगैश्च
घनकंकणदंडकैः १२ आमुष्टियमदंष्ट्राणां प्रहारै
र्दारुणैर्मिथः अन्यासंनतुरंगास्ते केशाकेशि महा
बलाः १३ बाणैरुन्नमलोहाग्रैर्विविधैस्तुरगान्मिथः

रथिनः सारथीन्श्चाश्वांश्छिन्नस्तुमलोत्सवे १४ वर्मंज्तुः
स्थूलशकरान्कलिकाशनशोभितान् धावत्सदाति
वृंदानि पक्षेरावृतघोरकान् १५ अहोपदातयः स्थू
रालोहसन्नाहसंवृतान् निजघ्नुः करिणा घातैस्तुरं
गान्सदिनोदितान् १६ ज्वलत्कलाभिर्भल्लीभिः कुं
जरान्समराजिरे धनुर्ज्यास्फालमुक्ताभिस्ताडयामा
सुरद्भुतं १७ तीक्ष्णास्थूलप्रहारैश्च रथिनः सहघोरकान्

म.भा.
४७

विनासांपरित्यज्यप्रजघ्नुश्चक्रुराक्षसान् १८ अक्षान्
विघट्टयामसुःकुठारैरतितीक्ष्णकैः सोदारोस्त्रप्रहारा
णांस्पंदनानांपदातयः १९ केचित्कांश्चिच्चमुशलैःस्थू
लैर्लोहार्गलादिभिः समरेस्हणीयामासुःप्रहाररुधि
रारुणाः २० केचित्खड्गांगसंजातैर्घातैःशीर्षाण्यप
हर्णयन् तथा निष्कासयामासुर्वह्निर्लोचनपिंडकान्
२१ कांश्चिदेकेहलाग्रेभ्योव्याचकर्षुःपदातयः नासा

राम.
४७

निहन्युरपरेनिस्त्रिंशैरस्त्रुत्तुंतुरैः २२ केचिच्चक्राणिमु

मुचुस्तीक्ष्णधाराणियज्वनः विसन्दुस्तान्परेशस्त्रैर्नि

त्यंसंग्रामपंडिताः २३ आफलंभल्लघातेननिर्गच्छंति

यथातथा जघ्नुःकराभ्यांसुभटाःकांश्चिदेकेपरस्परं

२४ ज्वलंनिस्त्रिंशसंघातघातैःक्षणांगयष्टयः परेषां

घोणदेशस्थंसरोषाद्रुधिरंपपुः २५ हाकेचित्तद्रुरसं

देशापीडनादहरनसून् अमेषांकोपवहलाःपतिता

ष्ववनीतले २६ उदग्रैरंकुशैरुग्रामग्राक्रमवतोद्विपा
न् ववंधुःपाशजालेनविषयानिवयोगिनः २७ हलं
जलायमानांशुसंनाहानुच्चतायुधान् केचिदुल्लोल
यांचक्रुस्त्रिशूलाग्रेणभेदिना २८ सेहिरेपतितान्
शीर्षेगदाघातानश्रमपदान् श्रीमंतोदर्वेचांसीव
नत्राणहरणोछवः २९ हेतिघातोछलछोणशोणि
तछत्रमंडलाः स्वामिसंतोषकरणान्नुयुधुःशस्त्रपा

यः ३० सुरांगनाननैः पूर्णेंदहस्रुपरीतचक्षुषः वीरा
मुहुरघातैरच्छशतचंद्रं नभस्तलं ३१ भुक्ता राफिंडि
मालोत्थाः सुवृत्ताघटिताअपि लेगुः परेषां हृदिये
कुशाह्वाइवदोर्जनाः ३२ कुठारदुःकुठारैकधाराहै
थिभवहुपुः कीर्त्तिःपुण्यतरंकिंविंनास्तीतिचावद
नृभयः ३३ शितशस्त्रोच्छलद्रक्तपरस्तानारणेभयः
अवनीशोभयामासुरुत्फुल्लाः किंशुकाइव ३४ मु

षिप्रहारैर्युयुधुः कवंधाद्दिव्यचक्षुषः स्वामिभक्त्या प्र
भवस्य कः परो वेत्ति तत्वतः ३५ छिन्नकंठकुठाराग्रे
नेन्द्रतुः सुभगारणे गजग्रीवां धराः केचिद्गणेशा इव
दुर्मदाः ३६ रणे विसिरसो वीराद्दुद्रुवुः खड्गपाणयः
दोर्मल्लावन्नेमत्तु यं दर्शयन्तः स्वयं ततः स्वसाधनं ३७
दर्पाद्दुरसिरसंछिन्नानिर्यग्यज्ञोपवीतिवत् तेभित्वा
मंडलं भानोः सुभटास्त्रिदिवं ययुः ३८ पतिताः कर

कुंभानां पतितानां रथोपरि । शृंगाररसनिर्मग्ना मानसा
इव तेवभुः ३९ नद्यो वक्रस्रुरक्तस्र शोणफेणावलीयुताः
हयानां रौप्यवर्णानां यासु हंसायितं गलैः ४० कर्त्रे
रीभिः समायुक्ताः पत्रैर्वीणविचित्रिताः तरंगादिषु
लोकास्तु शफराइव रेजिरे ४१ तोमराणि तरंगंतिया
सुकूर्मा इवोन्नताः शिरांसि हतवीराणां कमलत्व
मुपाययुः ४२ मांसाशकर्मनिरताः कृतकोलाहला

खाः इवभान्तिमदोन्मत्ताःशाकिन्योवनदेवताः ४२
कुञ्जराणांतुरंगाणांयास्वंत्राणिमहांतिच ग्राहतो
मायतुःसद्यश्चलंतिचवलंतिच ४३ जग्मुःशैवल
तांयासुकेशपाशाःसुविस्तृताः केशाकेशिमिथो
युद्धेशीर्षेभ्योयेवियोजिताः ४४ अधातज्जराला
सांतीरेतीरेविशेरते परान्नभोजनैस्तृप्ताब्राह्मणा
इवतुंदिलाः ४५ सद्यःशिवप्रभावेनगणानिपति

ताऽपि दृंतस्तु स्वायुधैर्युक्ता यथा पूर्वं रणावने ४७
दैत्यानां सुभटाः सर्वे नो तस्थुः समरे हताः आर्द्रा इव
मृदः पिंडाः प्राणहीना दिवं गताः ४८ तुष्टुवुः प्रम
थाः सर्वे देवं मार्तंडभैरवं जयेति मुनयः स्तोषाद्
वदन्युगपत्तदा ४९ अवादयन् जयवाद्यानि कुसुमा
नि दिवः सुराः ववर्षुर्ललितं गीतमगायन्सुरगा
यकाः ५० इति श्री ब्रह्मां० मल्लासेन्यवधो दशमोध्याः

यः १० सनत्कुमार उ॰ अथ स्वे निहते सैन्ये सदे
त्यो मर्षपूरितः ध्मातनासापुरो महिषः क्रोधाग्निःश्वा
सयोगतः १ वन्हिकुंडेक्षणः कंपमानखड्गः सुभी
षणः शीघ्रं नुदेति तुरगानुवाच निजसारथिं २ ततः
सेनाधिपो दैत्यः खड्गदंष्ट्रः प्रतापवान् सुमहापय
दीर्घं स्वं महिषाख्यमसुरेश्वरं ३ कियत्सैन्यमिदं देवया
समाक्रमिवाधुना नालं तव प्रकोपाय तां हलंदीय

तांमम ४ नवमूर्त्तिः प्रतापोहं संग्रामेजयनिश्चयः हं
ता वीरसहस्राणामेकाकीतन्त्रवेत्सिकं ५ मयिति
ष्ठतिदेवेंद्रकथंतंप्रुच्छसेस्वयं क्षणं स्थितायस्त
स्यपश्यमेरणाकोशिकं ६ अथासौदैत्यराजेनखङ्ग
दंष्ट्रः समीरितः स्वामिसन्मानतोषेणययौयुद्धाय
सन्मनाः ७ वाजिनांपंचभिर्लक्षैरथैस्तद्द्विगुणैः स
ह चतुर्गुणैश्चकरिभिर्गजाहृदैश्चशस्त्रवान् ८

वाद्यदुंदुभिनिर्घोषैः सिंधुपानस्फुरन्मदः हतवंदीज
नस्तोत्रश्श्वारुचामरवीजितः ९ तमायांतः समालोक्य
समाद्दिष्टः षडाननः युद्धायेतिमहेशेनखड्गदंष्ट्रेण
सत्वरं १० प्रसादइत्युवाचेसंशेनयानिजयावृतः अ
नेकशस्त्रयुक्तस्वामीचतुरंगपरीवृतः ११ मयूरपिच्छ
चमरैस्सेवितस्छत्रमंडलैः मयूरवाहनतत्रत्वस्थो
तसमरांगणे आवयोःसमरेद्यस्यात्तेनाभ्यां किं प्र

योजनं युध्यस्वेतावद्ब्रह्मार्कावेङ्द्रदंष्ट्रः षडाननं बा
लस्त्वं शूलिनः सर्वे सैन्येन किल रदयसे संग्रामाय
ससैन्यस्त्वं नष्टत्वशरणावयं १४ यात्र त्वपोलिकां
दुर्गां नासाभ्यां जहिरेकफं नवनीतादने सक्तः कथं
युधाय वल्गासे उत्संगं याहि रेमा नर्मुं चमुं चाद्य सं
त्तमं कोमलानि नवांगानि निर्दयाममभल्लयः १५
इति तस्य वचः श्रुत्वा त्रुकोपस्तु तरामसौ विभ्राधदे

म.मा
५३

त्पंबाणानां सहस्रेणासिदं च्छुकं १७ तेन तेखड्गजा
लेन वाणाश्छिन्नास्तु लाघवात् विद्याधचसेनान्यं
वाणैः शतसहस्रशः १८ बाणजालं समायांतं वीक्ष्य
सोपार्वतीसुतः शक्त्या निवारयामासक्रमं त्वावर्हि
नाशनः १९ ततः सकुंजरारूढः शफरीध्वजलक्षितः
जघान षण्मुखं बाणै रुक्मस्थः समरे बली २० व्य
र्थीकृतं मयूरेण समुत्पत्य नभस्तले संधानं तस्य

राम.
५३

स्वामिनाधिष्ठितेनच २१ संधानंमर्थ्यमानंमत्वावीक्ष्या
काशेनभोन्मुखं जघानकेकिनंसच:शरेणाशरुषं
गले २२ ततः कोपेनपूर्णोसावविध्यंतस्यकुंजरं
मल्लनकर्णैरिपिच्छाग्रमर्धचंद्रेषुणमलघु २३ च
पमुखस्यधनुर्वंशंक्षुरप्रेणाशुगेनच विच्छेदप्रो
च्चतंदैत्योध्वजंभल्लासिधारया २४ ततोविनिर्मि
तांस्तुंगान्किरीटानाशुगैःक्षणात् खड्गिस्तद्वि

म.मा
५४

गुणैः कर्मकुंडलानी भुजन्मनः २५ व्याकुलीकृतो
सौबाणजालैर्हरि तदा तदपि ततः कोपेनमहता स्फुर
दं छायभीषणः २६ मुमुचशक्तिमरत्सुग्रांशतघंटा
विनादिनी कल्पांतज्वलनज्वालानिर्मितामिवदुर्ध
रां २७ दैत्याधमस्यहस्तेति सतेनाशुगवृष्टिभिः वा
र्यमाणोपिहृदयेपतत्तस्यचपापिनः २८ विह्वलः
शक्तिघातेनसुमोचास्त्रंमदोद्धतः पलायमानंत

रम.
५४

त्सेन्यं मारयामासुरीश्वराः २९ केचिन्मुसलघातैश्च मु
नरांपीडितोरसः रक्तानिराक्षसावेमुर्दिग्भ्रांतामभ्रां त
चक्षुषः ३० परिघाघातसंभ्रांतमानसाराक्षसाःप
रे आसंनमरणान्मूर्छामायमुस्तत्रसंगरे ३१ पति
तानांचशस्त्राणांधाराभिर्गलितांध्रयः केचिद्धावं
तिसमरेभीरवस्तुपराङ्मुखाः ३२ पपुःस्वेदजलं
केचित्तुरंगानांवदंतिनां भंगभीतिरुषाक्रांताःको

म.मा.
५५

णपाजीविताशया ३३ इतिश्रीब्र०क्षेत्रखं०खड्ग
देष्ट्रबधोनामैकादशोध्याय: ११ सनत्कुमारउ०
हतेसेनाधिपेतस्मिन्ससैन्येथशिवात्मना कोटीनां
राक्षसांस्वामीहेमदंष्ट्रश्चचामरे: १ बीज्यमानोरथा
रूढ: शस्त्रविद्याविशारद: उल्कामुखोमहावीर:
क्रोधेनरणमाययौ २ वाजिनांलक्षविंशत्याशत्यार
थांकोटिभिर्वृत: कोस्माद्रिकुंजरैर्युक्तोसंख्येयेपैद

राम.
५५

गेहेतः ३ नमालोक्य हतोत्साहं समराभिमुखं शिवः
गणानामधिपं देवं नुनोद रथिनं तदा ४ दैत्येनाभि
हतः सोथ किं ते युद्धेन बालक मधुराणि च खाद्यानि
मोदकप्रमुखानि च ५ कुमाराय स त्वं गेहे खादयंश
स्त्राणि संगरे सत्तेनत्वा हतः पश्चाद्वा बालत्वमलं तव
दैत्यसेनासु हत्वान्वो मोदकान्भक्षयाम्यहं शिवस्य बा
लकोन्हं नेभवता मंतकोधुना ७ इत्युक्तो राक्षसः कोपा

न्वज्वलद्दहनेक्षणः मुमोच तीक्ष्णधाराणां शराणांश
तमद्भुतं ८ ततः शराणां सम्पातेन गणेशो लीलया छिन
त् संदधे सोनन्तो दैत्यः शराणां द्विसहस्रकं ९ ते शरा वा
जिनां मर्मगे के चिन्मग्नाः सपत्रकाः उन्मार्गगामिनो घुव
न् हयाः सारथिना हताः १० अक्षोवभंजमकरस्तूर्णी
ष्णूतोऽभवन्नदा हाहाकृतं सुरैस्तत्र ततः क्रोधाकोपपूरि
तः ११ विद्याधरगणोलस्यबाणैः सारथिनं ध्वजं तं च

दैत्यं गणाध्यक्षो विरथं प्राकरोत्तदा १२ लोहस्फारमहन्न
स्य गदां जग्राह दानवः भ्रमंतीं तां कुठारेण चिच्छेद च
गणाधिपः १३ गृहीतुमुद्यतः शक्तिं यावत्क्रोधान्महा
सुरान् तावज्जघान गणपः सदंतेनाशुमुष्टिना १४ ता
वत्सनरसिंहो मूर्ध्नि लिलेख नखैः करं तस्य दंतप्रहारेण
प्राणान्नजग्राह विघ्नराट् १५ शिरोपिध्मान्ननयनंल
लज्जिह्वं चलं छदं छिन्नं पदाभिघातेन पपात विशिरा

म.भा.
५७

भुवि १६ विलोक्य तं हतं दैत्यं ततः सैन्यं योद्धुमुत्सुकं अ
नन्तस्य गणैः क्रोधाद्युद्धे नीतं यमक्षयं १७ तुरंगं कुंज
रं माहारथं सारथिभिः सह अयुतं सरे दृष्ट्वा दीर्घनि
द्रामुपागतं १८ उत्थायामुखं महासैन्यं समरे रविलोच
नः अशीत्या वाजिलक्षाणां रथैः कोटिद्वयेन च १९
कुंजराकुंजराणां चतुःकोट्या विसंख्येयैः पदातिभिः
अयुतैर्जयवाद्यानां सहस्रेणोंनतध्वजैः २० स्वामि

राम.
५७

सन्मानतोषेणास्फुरंनासापुटद्वयः स्फूर्जच्चंडभुजादं
डस्फुरद्दंडैश्चवीजितः २१ चामरैःकुंजरोमाख्यःसंग्रा
मायसमाययौ तमायांतंदिशोवीक्ष्यदिदेशजयदिनं
२२ प्राप्नवंतंमहेशस्यसारूप्यंनागभूषणं त्रिनेत्रंपंच
वक्त्रंचचंद्रमुक्ताद्यद्युतिप्रभं २३ त्रिशूलादीनिशस्त्रा
णिदधानंचंद्रशेखरं कांचनस्यंदनारूढंसंग्रामोत्स
वपीवरं तमुवाचशिवाकारंतंमहेशोसिरेसुर ते

म.मा.
५८

तेनोक्तं च पयार्शंभोः स्वरूपं ज्ञातवानहं २५ किंकरः शं
करस्याहं तद्वधार्थमुपागतः तमाहकुंतलोमासान
मरत्वंमत्तंतव २६ रौदैत्यहतानांतोहंकस्मान्नातेमरक्ष
तु तामित्युक्त्वाललाटस्यस्वेदेनस्यांममर्द्दच २७ तत्र
संधायबाणानां शतलक्षं प्रस्तुतिमत् आकर्णधनुरा
पूर्यकुंतलोमामुमोचतं २८ स्वहुंगचालनोच्छालैः
शरांस्तान्संनिराकरोत् जयनंदीगणाः शंभोर्धनुरादा

राम.
५८

यस्तुप्रभं २९ सदधेबाणमुत्सृग्यं धिग्धं हालाहलेन
च आपूर्यारस्थलस्फालं तेन देनमनाउयत् ३०
वार्यमाणोपिवाणानां शनैर्वक्षस्थले पतत् निर्गते
पृष्ठं धेणवाणेमेनेन सध्यथा ३१ अथासो शरजा
लेनत्रासयामासनंदिनं ससैन्यं समरे तत्रयुद्धमं
त्रप्रभाववान् ३२ परास्तुत्वोभवं नादीरथाश्वै
लितं क्षणं सारथिः शारनिर्भिन्नः पपातधरणीतले

धनुर्मुष्टियुतं स यष्टिंच्छेदध्वजमुन्नतं तेनद्रवद्रथे
नाभिःस्तुम्भितो मुख्यमोदनात् ३४ पलायमानं देवा
नां सैन्यं चूर्णीचकार सः मर्द्दनैश्चक्रनेमीनां खांग
कुंताहतैर्गजान् ३५ घातयामासतुरंगांछत्रपाते
श्च दारुणैः एवं संक्षीयमाणेथ सैन्ये मेघबलद्रुणे
क्रोधेनाक्षरितस्वांतः संवर्ताग्निविलोचनः अन्यथा
रथिनायुक्तः सिंहनादंचकार सः ३७ तेनसर्वेहतं

सैन्यं दैत्यानां शरवृष्टिभिः विद्याधकुंतलोमानमा
गेयेनाश्रुपत्रिणा ३७ सपत्नीशोषयामासाम्रतंतस्य
हृदिस्थितं ततः सविक्लोदैत्योप्यमर्षस्तुरभ्यत्तदा
३८ हतेतस्मिंस्तुराधर्षो श्रीमतीजयनंदिना पुष्पा
णामुमुचुर्देवा आशीर्वादानृषीश्वराः ३९ इति
श्रीब्र॰ क्षेत्रखं॰ उल्कामुखकुंतलोत्क्रोवधो द्वादशोध्यायः
सनत्कुमार उ॰ ततो हतेषु दैत्येषु सेनानी सैनिकेषु च य

हृत्तं संगरे तस्मिन् श्रूयतां तदृषीश्वराः १ मणिमल्लो
रुषा पूर्णो रणवाद्यमहोत्सवौ नादभावपि संग्राममेति
हेतां क्रोधनिर्भरो २ उवाच भ्रातरं मल्लं मणिः क्रोधो
द्धुरस्तदा दैत्यराज्ञ महाभाग्योदयं मे प्रपश्य संगरे ३ यः
स्वयं जगतां नाथः शक्रादिसुरपूजितः स योद्धाद्य जयं
तस्मिन् लप्स्ये वा सलप्स्येन वा ४ पराजयजयाभ्यां मे जय
एवमस्तु निश्चितः इत्युक्त्वा सिंहनादेन जगर्ज मणिकासु

रः ५ त्रैलोक्यं हरयामासस्ववशाद्भूतिगावनः चेलुःके
लाशशिखरेवद्वसिद्धसमाधयः ६ हुंहानां किंनराणां च
हहानांलिंगनानि च कंठप्रारेःकमलालिलिंगप्रतिश्र
त्रुभीः ७ सिंदूरोद्धूलनश्रीरामायावीतुंगमस्तिमान्
लिखदुत्तकिरीटस्य कोधानारिदमंडलं ८ शोभितोबा
हु विशालारक्तचंदनचर्चितः तडिल्लक्षप्रतीकाशःक
र्णकुंडलमंडितः ९ नीलमेघावलीछत्रः सर्वायुधलस
त्करः जपाकुसुममालाभिर्दर्पन्नद्धैभुजागलः १०

पदातिर्गिरिसारैःस्वैःपद्मासैर्महतीतलं पदेपदेवि
नियमन्मोहुमभ्यायथौरणे ११ तमभ्यागतमालोक्य
श्रीमन्मार्त्तंडभैरवः प्रहसन्वारयामाससंग्रामायनि
जान्गणान् १२ मार्तंडभैरवऊः रेरेगणाःसमांयुद्धंवी
क्ष्यध्वंखलुमामकं शौर्यंवीक्ष्यमहेशस्यराक्षसस्यतथा
वलं १३ वमुक्त्वाभैरवस्तद्वत्पदातिःसमरेच्छया सिंहनादे
नमहताक्षोभयामासरोदसी १४ तमुवाचमहादेवः
केनत्वमसिसंप्रेषितः भिक्षायांचासदाश्रेयोभिक्षुणांस

मरेणकिं १५ श्रुत्वेतितस्यवचनंत्रिनेत्रः क्रोधमूर्छितः
दुद्रावतंदुरात्मानंस्फुरन्नासापुटद्वयः १६ लोहभारस
हस्राणांगदयाकाशतुंगया जघानमूर्ध्निसहसाजहे
तांचसखेटकान १७ अवीवदच्चपोद्धारंतच्छेभैरवते
वलं उत्तुंगोसिचपीनोपि निःसारत्वान्महालघु १८
तदाकर्ण्यवचस्तस्यपुनारोषान्मदोद्धतं जहिंसवाणै
र्वेगेनसहस्रप्रसवस्समैः १९ नानागतान्शरान्वीक्ष्य
करवालेनसोछिनत संम्यग्जितेंद्रियोगीचित्तेन
यो

विषयानिच २० ततः स रासभः क्रूरः क्षुरप्राणी शाता
धिकं सहस्रं संदधे ज्यायां शराणामग्नितेजसां २१ प्र
क्षीचकार तान्बाणान्हुंकारेण महेश्वरः ततस्ताउपद्रु
ग्रेणाकिरीटेषु महेषुणा २२ उज्जग्मुः स्तत्र रत्नानि ख
नित्रेणाकरेयथा अभ्यधावत्ततो देवं सहस्रौ भैरवः
स्वयं २३ चंद्रहासेन तीक्ष्णेन सहसा सशिरोच्छिनत्
तावत्सा रक्षा सो भूतत्र भुजंशं शोभोदेदेशाच २४ ततः कर्णि
कपाशं प्रस्तं जयान स्वयं रुषा शक्तिकान्तां मुखेने

वज्रग्राहगुटिकामिव २५ अथशक्तिंत्रिमूलेन छेद
यामास तंजवात उरस्थले पृष्ठवंशे यथाभिद्यतितत्
क्षणात् २६ देवेशोथाभवत्तुंगस्तुरंगवदनः क्षणात्
चकारहेषामतुग्रांजगत्क्षोभविधायिनी २७ अंह्रि
चेष्टाणवाणेनग्रीवांतस्याच्छिनच्छिवः तस्यासीतकौ
नरीग्रीवांशुंडादंडविराजिता २८ तांजघानकुठारे
णतीक्ष्णधारेणाम्बुहुनि ततोसौतुरगाह्वदःसादी
स्यादुग्रखङ्गवान् २९ निहन्यमानःशास्त्रौघैर्दुर्धरो

म.मा.
६३

सौ महेश्वरं जघान करवालेन भुजमध्ये मदोद्धतः
तेन भषणनागेंद्रः प्रहारेण च खंडच ततो मुमोच
सहसा बहलस्त्रं गिरिजापतिः ३१ ३१ सतेन व्याकु
लीभूतः पपात श्वेनसंयुतः जलेयच्चतुरंगाख्यमप्ये
णीर्थस्तुपदं अथनारी च तीक्ष्णाग्रे ब्रह्मांडं समप
रयत दैत्यराजः शिवं लक्ष्मी हृत्सर्वे निरंतरं अंगेत
स्पशराः शंभो विश्वनाहुनटस्य च ललाटपट्टेमुकु
टे कपोले कुंडलद्वये ३४ भुजेषु वक्षसि कृपालमा

राम.
६३

भग्नाः समंततः स्कंधयोर्मोक्षि देशे च ग्रीवां स्कंधहृयां
तरे ३५ मुंडमालाशरैर्भिन्नाः शंभोर्दैत्यास्समंगरे मत
स्य मरणं प्राप्य महो चित्रा विधेर्गतिः ३६ अर्द्धचंद्रश
रैर्निर्भिन्नाः शिवस्य भुजंगमाः दैत्यैर्नाभिन्नताः का
लाश्वैर्बहुः फणान्विताः ३७ अद्भुतो ह्येडमाः शंभोर्
गजरमं स्तदा दैत्यराजस्य बाणोहिवैरिपानस्थि
तेः फलं ३८ अथतं दुंडुरं दृष्ट्वा महावीरमणिं शिवः
ज्वलंज्वलनसंकाशं शूलमुग्रमुमोचह ३९ नदाहतं

परसुनाचक्रखङ्गशरोत्करैः निवार्यमाणं दैत्येन घा
तं कुर्म्मैव एवेत्तं ४० तेनोरसि विनिक्षिप्त त्रिशूलेन
सदैत्यराट् पपात विह्वलोप्यस्मोक्त्रमं लोचन शुभ्रिकः ४
१ दालुं मूर्द्धिपदं शंभु यावद्भालपत्यहो दैत्येन परया
मत्कयाल्याप्यितं नित्सम् हुनि ४२ स्कयात्मसीति दैवेश
वैरेण परितोषितः इष्टोस्यं तेरणेन तुस्त्वां न सुंचामि
सर्वथा ४३ निजशौर्येण सन्तुष्टं त्तु नाव जगदीश्वरे ह
ष्टं साक्षात्क पापाग्नी मन्नो सौ दैत्यपुंगवः ४४ मनिरुद्ध·

नमस्तेमृतनाथाय सर्वांतर्यामिने नमः नमो नागेंद्रभू
शाय नीलकंठाय ते नमः ४५ नमो रौद्राय रुद्राय नमस्ते
दानवारये नमः शुद्धाय शांताय कैवल्यपतये नम ४६ न
मो रत्नावलीवंचन्नुकुटाया सिपाणये नमो देवाय म
हते नमो गंगाप्रियाय ते ४७ नमो दयासमुद्राय देवदेवा
य शाश्वते नमः कमल किंजल्क पुंजपिंजरतेजसे ४८
चंद्रचंचत्कलामौले त्रिनेत्राय नमो नमः मयूरपत्रचम
रवीऽप्रमानाय ते नमः ४९ सप्तकोटिगणाकीर्णसेन्या

म.मा.
६५

यशिवतेनमः नमस्त्रिशूलहस्तायनमस्तेत्रिगुणात्म
ने ५० नमः परमहंसायनमः पात्रधरापते नमःकारु
णपूर्णायनमस्तेस्वस्तिकारिणे ५१ नमोभक्तजनानं
दविधानविधयेनमः नमः परमकैवल्यदायिनेविश्वधा
यिने ५२ डमड्डमरुडांकारकारिणेतेनमोनमः मार्त्तंड
भैरवः तुष्टोहंत्वयुद्धेनमणेभक्त्याचपूर्णया ५३ वरं
वृणीष्वचित्तस्थंतुभ्यंदास्याम्यहं ततः मनिरुवाच यदि
तुष्टोसिदेवेशात्कृपयामाणिमूदन ५४ मत्कृतंयद्भवत्तो राम.
६५

त्रममुष्य पठनान्नृणां जायेत लक्ष्मीरतुला दानाद्धिश्वो
पकारिणी ५५ सर्वभोगप्रदा पुत्रवाजीवारणसुंदरा भो
ग्यश्चांते रणे शौर्यं वाणी नवरसोज्वला ५६ मणिद्वीरस्तव
पादाधोभ्यस्याद्देव निरंतरं तुरंगसहितं रूपं मदीयं तव
संनिधौ ५७ मार्तंडभैरवकृः मणिभद्रेनेतवयायश्चतंतने
भाविताद्भवं त्वं पाहि परमं मोक्षं शाश्वतं ममशासना
त ५८ श्रुणवंतामावयोर्युद्धं सिद्धयः संतु सर्वदा ५९ इ
तिश्री ब्रह्मांडपु० मणिकासुरवधो नाम त्रयोदशोध्या

य: १३ सनत्कुमार उ॰ अथ तुष्टो महादेवो मण्णेभ्ये
ज्ञात्वा प्रसंनधीः ध्यातानस्येति रूपयामल्लं रक्षितुमिच्छति
१ उवाच विष्णुं देवेशं मल्लमाज्ञापयेति च तं गत्वा ब्रूहि
